Sadvidya Journal of Sanskrit and Indian Knowledge Systems
DOI: 10.18311/sadvid/2025/55131

शृङ्गारकाव्यानां प्रयोजनम्

L. Sampath Kumar

Associate Professor, Chinmaya Vishwa Vidyapeeth, Ernakulam, Kerala – 686662, India;
sampath.kumar@cvv.ac.in

1. सारांशः

अस्मिन् लेखे शृङ्गारकाव्यानां प्रयोजनं भारतीयकाव्यशास्त्रदृष्ट्या विशदीक्रियते। भरतमुनिप्रणीतरससूत्रस्य, आनन्दवर्धनस्य ध्वनिसिद्धान्तस्य, अभिनवगुप्तस्य अभिव्यक्तिवादस्य च आलोकनेन शृङ्गारस्य केवलं लौकिकरतिकथनरूपत्वं न स्वीक्रियते, अपि तु सः धर्मादिपुरुषार्थोपदेशपर्यवसायी इति प्रतिपाद्यते। मम्मटाद्याचार्यैः निर्दिष्टानि काव्यप्रयोजनानि अपि अस्मिन् परिशील्यन्ते। कालिदास-भवभूत्यादिकाव्येषु उदाहरणैः दर्श्यते यत् रसानुभवः सहृदयस्य अन्तःकरणे आनन्दं जनयन् जीवनमूल्यबोधनस्य साधनं भवति। अतः शृङ्गारकाव्यं सौन्दर्यानन्दस्यैव न, किं तु नैतिकसंस्कृतिपरिपोषणस्यापि प्रभावी माध्यमम् इति निष्कर्षः।

2. प्रस्तावना

काव्यालापप्रसङ्गेनकालोगच्छतिधीमताम्इत्यस्तिभणितिः।एवंसति, काव्यानां मुख्यं प्रयोजनं कालक्षेपणमेव उत अन्यत्? इति आशङ्कायां परिशीलनं कुर्मः । कुमारिलभट्टः श्लोकवार्त्तिके शब्दपरिच्छेदे एवमभिप्रैति – यत् कार्याकार्यविषये जनान् शिक्षयति तच्छास्त्रमिति । शास्त्रशब्दस्तु प्रायेण विध्यर्थे प्रयुज्यते । विशिष्टज्ञानप्रदायिनो ग्रन्थाः धर्मशास्त्र-वास्तुशास्त्र-शिल्पशास्त्र-अर्थशास्त्र-नीतिशास्त्रप्रभृतयः शास्त्रशब्देन उल्लिखिता भवन्ति। तानि च शास्त्राणि मनुष्यान् कार्याकार्यव्यवस्थितौ मार्गोपदेशं कृत्वा मोक्षप्राप्त्यै प्रेरयन्ति । एवं सति, शृङ्गाररसप्रधानानि काव्यानि अपि तादृशम् उपकुर्वन्ति वेति चिन्तनीयो विषयः ।

यदि साहित्यं कीर्तिप्रीतिकरं मन्यते तर्हि तस्य मुख्यप्रयोजनं तावत् सहृदयहृदयानन्दः स्यात्, उताहो शास्त्रमिति मन्यते तर्हि तस्य मुख्यप्रयोजनं तावत् धर्मादिपुरुषार्थशासनं भवेत् । अतः साहित्यं काव्यरूपात्मकं रसानन्ददायि! आहोस्वित् शास्त्ररूपात्मकं तत्त्वहितपुरुषार्थबोधकम्? इति निर्णयोऽत्रावश्यकः ।

3. सैद्धान्तिकभूमिका

आलङ्कारिकानां पूर्वजः भामहः वदति –

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिषेवणम् ॥

अनेन लक्षणेन ज्ञायते यत् साहित्यस्य उद्देश्यं तावत् अलौकिकानन्दजननं तत्त्वहितपुरुषार्थबोधनं चेति । एवं सति संस्कृतसाहित्यम् उद्देश्यद्वयमपि साधयितुं प्रभवति वेत्यालोचनां कुर्मः । ध्वन्यालोके आनन्दवर्धनो निर्दिशति –

"रसस्य पुरुषार्थस्य च स्वप्राधान्येन चारुत्वमविरुद्धम्" ।

4. काव्यानां प्रयोजनविमर्शः

रससंप्रदाये अग्रगण्यो मम्मटाचार्यस्तु –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥

इतिकाव्यप्रयोजनमाह।तत्रपरनिर्वृतिस्तुरसास्वादनानन्दानुभवः, कान्तासंमिततया उपदेशस्तु मानवीयजीवनमूल्यशासनमिति द्वे मुख्यप्रयोजने उद्दिष्टे ।

कुन्तकोऽपि सुस्पष्टमुद्घोषयति –

धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ॥

इति । हृदयाह्लादकत्वं धर्मादिसाधनोपायत्वमिति द्वयमपि काव्यप्रयोजनमेतेनाङ्गीकृतम् ।

5. पुरुषार्थसमन्वयः

यदि काव्यानां हृदयाह्लादनमात्रे सति प्रयोजने क्रीडनकादिवत् तानि काव्यानि कालक्षेपायैव भवितुमर्हन्ति । अथवा धर्माद्युपदेशमात्रे सति प्रयोजने नीतिशास्त्राणि भविष्यन्ति । अतः साहित्ये रसानाम्, अलंकाराणाम् एवं तत्त्वहितपुरुषार्थानामपि संनिवेशो मनोरञ्जको भवति।

संस्कृतवाङ्मये उपर्युक्तविषयः बहुभिः कविभिः बहुधा प्रयुक्तोऽस्ति । अनयैव दृष्ट्या रसकविः, शास्त्रकविः, उभयकविश्चेति विभागोऽपि सञ्जायते । केचन रससंप्रदायानुयायिनो रसकविं रसकाव्यं च विशिष्टरूपेण प्रशंसन्ति । परन्तु राजशेखरः एवं मन्यते –

"स्वविषये सर्वो गारीयान् । न हि राजहंसः चन्द्रिकापानाय, नापि चकोरः अब्ध्यः क्षीरोद्धरणाय" इति । अतः रसकविर्वा शास्त्रकविर्वा भवतु, द्वावपि मन्तव्यौ श्लाघनीयावेव ।

संस्कृतसाहित्ये वयं पश्यामो यत्, वेदेष्वपि प्रकृतिसौन्दर्यवर्णनमुपलभ्यते । वेदान्तेषु उपमाद्यलंकारा बहुशो

*Author for correspondence

Article Received on: 10.08.2025 *Peer-reviewed* Accepted on: 11.12.2025

वर्तन्ते । एवं काव्येषु धर्म-नीतिबोधकांशा अपि दरीदृश्यन्ते । प्रायशः, संस्कृतसाहित्यमन्तरेण लोकसाहित्ये एतादृशस्समन्वयो नैवोपलभ्यते यथा रामायणमहाभारातादिषु । एवं संस्कृतवाङ्मयम् आनन्दप्रदानं नीतिमार्गदर्शनमिति उद्देश्यद्वयमपि पुष्णात् देदीप्यते । अस्मिन् शोधपत्रे शृङ्गाररसप्रधानकाव्येषु कथं धर्मादिविचाराः संनिवेशिताः इति सोदाहरणं निरूप्यन्ते ।

6. उदाहरणविश्लेषणम्

यद्यपि कालिदासस्य काव्यानि शृङ्गाररसप्रधानानि तथापि धर्मादिपुरुषार्थोपायोऽपि सर्वत्र विलसत्येव । रघुवंशमहाकाव्ये वीररसः तथा सत्य-पितृ-गुरुवाक्यपरिपालनं; शाकुन्तले शृङ्गारः धर्मश्च; कुमारासंभवे शृङ्गारः तथा तप-आचार-अनुष्ठानानि, एवम् अन्येषां कवीनां काव्येषु च रसपरिपाकः धर्माद्यर्थविचारः इति द्वावपि परस्परं पुष्णन्तौ प्रविलसतः।

शाकुन्तले शकुन्तलादुष्यन्तयोर्मध्ये कामः सरलः सरसश्च भवति आदुर्वासशापम् । ततः परं शापवशात् दुष्यन्तः शकुन्तलां स्मर्तुं न पारयति । अतः तां पत्नीरूपेण स्वीकर्तुमसमर्थः धर्मसङ्कटे पतति । 'किं परकलत्रस्वीकरणेन अधार्मिको भवेयम् अथवा स्वकलत्रतिरस्करणेन क्रूरो भवेयम्' इति तस्य मनसि धर्मशास्त्रसमस्यान्तर्गतविचारः उद्भवति। राजा धार्मिकरीत्या तां निराकरोति । अत्र विचारं कुर्मः । दुष्यन्तः प्रथमतया शकुन्तलां दृष्ट्वा सहसा तया सह न रमते । सः शकुन्तलां प्रति अङ्कुरिताभिलाषः तस्याः गम्यागम्याविचारे मुनिकन्यकाया अपि पाक्षिकं गम्यत्वं संभवतीति विचिन्त्य गम्येति पक्षं समर्थयमानः तर्कयति –

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥

इति । अनन्तरं कथयति – " तथापि तत्त्वतः एनामुपालप्स्ये " इति । अस्यार्थो भवति – एवं मनःप्रवृत्त्या गम्यत्वे निश्चितेऽपि तावन्मात्रेण अपरितुष्यन् अत्यन्तधार्मिको दुष्यन्तः तत्वं जिज्ञासुः अभवत् इति । एतादृशः धार्मिकचेताः मुनिशापात् विस्मृतसर्ववृत्तान्तोऽपि झटिति शकुन्तलां न तिरस्करोति । सः वदति –

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥

अस्यायं भावः – यथा चन्द्रमाः कुवलयान्येव विकासयति न तु कमलानि, सूर्यश्च पङ्कजान्येव विकासयति न च कुमुदानि तथैव जितेन्द्रियाः पुरुषपुङ्गवाः परकलत्राणि मनसापि न कामयन्ते इति । ततः सः धर्मशास्त्रनिपुणं पुरोहितं पृच्छति – भवन्तमेवात्र गुरुलाघवं पृच्छामि ।

मूढस्स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥

इति धर्मसङ्कटमापन्नः शास्त्रोचितमाचरति । यद्यपि नाटकमिदं जनसमाराधनरूपेण विरचितं तथापि धर्मशास्त्रपालनादिकं च बोधयितुं प्रभवति ।

अथ कुमारसंभवे, पार्वती परमेश्वरमेव पतिरूपेण प्राप्तुं कृतनिश्चया तपश्चरति । अन्ते तस्यास्तपोबलेन क्रीतो महादेवो ब्रूते– अद्य प्रभृत्यवनताङ्गि तवास्मि दासः क्रीतस्तपोभिः ... इति । पार्वती तदैव परमेश्वरं न पर्यणयत् । सा धर्म-विधि-नियममनुसरन्ती सखीमुखेन शंकरं संबोधयति –

दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ।

पशुपतिरपि सप्तर्षीनामन्त्र्य – "तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः" इति लोकानुष्ठानं पालयति ।

स्वप्नवासवदत्ते नायकः उदयनः नायिका वासवदत्ता च परस्परं स्निह्यन्तौ दम्पती स्तः। उदयनः वासवदत्तां बहुमन्यते । दुर्दैववशात् उदयनस्य राज्यं नष्टं भवति । तत् पुनः प्राप्तुं तस्य सुमतिना मन्त्रिणा यौगन्धरायणेन उदयनपद्मावत्योः विवाहः आयोज्यते । एतदर्थं वासवदत्ता पत्युः श्रेयसे स्वार्थं विहाय त्यागिनी भूयात् इति यौगन्धरायणेन उपदिश्यते । सापि तदङ्गीकुरुते ।

एतासु घटनासु भासः शृङ्गार-करुणरसाभ्यां सह त्याग-शान्ति-औदार्यादिमानविकमूल्यानि प्रशंसनीयरीत्या आविष्करोति । वासवदत्ता अग्निना भस्मसात्कृतेति विज्ञाय उदयनस्य प्रलपनमेवं वर्णितम् - "तस्याः शरीरोपभुक्तानि दग्धशेषाणि आभरणानि परिष्वज्य राजा मोहमुपगतः । महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय किमपि किमपि प्रलपितवान् । 'इह तया सह कथितम्' 'इह तया सह कुपितम्' 'इह तया सह हसितम्' इत्येवं विलपन्तं तं राजानममात्यैः महता यत्नेन तस्माद्वामादपक्रान्तम्" । अत्र करुणरसस्य विस्तरशो निष्पत्तिरुपलभ्यते। इतः आरभ्य सम्पूर्णे नाटके उदयनवासवदत्तयोः प्रगाढस्नेहः अनेकेषु स्थलेषु प्रकटीकृतो वर्तते । पद्मावत्या सह विवाहोत्तरमपि उदयनो वदति –

पद्मावती बहुमता यद्यपि रूपशीलमाधुर्यैः ।
वासवदत्ताबद्धं न तु तावत् मनो हरति ॥

इति । वासवदत्तायाः त्यागस्य अप्रगाधत्वं तु राज्ञः स्वप्नसन्दर्भे ज्ञायते । स्वप्नगतोऽपि राजा वासवदत्तायाः उपस्थितिम् अवगम्य पृच्छति – 'किं कुपितासि ?' । परं वासवदत्ता ब्रूते – 'नहि नहि दुःखितास्मि' इति । सा स्वाधीनपतिकतां परित्यज्य पत्युः क्षेमलाभाय पद्मावत्याः सपत्नी भवति । अत एव वासवदत्तायाः स्वार्थपरित्यागो नाम धर्मः नाटकमिदं विशिष्टं करोति ।

उत्तररामचरिते शृङ्गाररसः प्रजानां "किं वदन्ती"-उद्भूतापवादहेतोः करुणरसात्मना परिणमति । रामस्य मनसि सीतायाश्चारित्र्यविषये न कोऽपि सन्देहो वर्तते । रामस्य संभावना तु एवमस्ति –

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥

परन्तु अज्ञाततत्त्वाः अयोध्यापुरवासिनः देव्यां वैदेह्यामपि सापवादास्तिष्ठन्ति । रामस्तु आदर्शभूतो राजा, धर्मपरिपालनमेव प्रधानमिति मन्वानः सततं प्रजारञ्जने तत्परः वदति –

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥

इति । अतः लोकाराधनायैव रामेण आपन्नसत्वापि सीता वने विसृष्टा । यावत् प्रजाः सत्यमवगच्छन्ति तावत् एषा समस्या वर्तिष्यते । यदा प्रजाः आत्मदोषम् अवगच्छन्ति सत्यमपि अङ्गीकुर्वन्ति तदा समस्या स्वयं दूरीभवति । वाल्मीकिरामायणे यत् करुणान्तमभवत् तदेवात्र हर्षान्तं भवति अस्य मानवीयमूल्यस्य समालम्बनेन ।

मृच्छकटिके औदार्यगुणस्य माहात्म्यं परिपोषितम् । नायकः नायिका च उभौ उदारगुणसम्पन्नौ । वसन्तसेना चारुदत्तस्य कृते समृद्धिसम्पन्नं जीवनं त्यक्तुमुद्युक्तास्ति चेत् चारुदत्तोऽपि परमोदारतया वेश्यां कुलवधूरूपेण स्वीकर्तुं सिद्धोऽस्ति । न तावन्मात्रं, रूपकेऽस्मिन् – चोरः, द्यूतकरः, भिक्षुः, मैत्रेयः, वसन्तसेनायाः वृद्धा माता इति सर्वाणि पात्राणि उदारचरितोपेतानि वर्तन्ते । यद्यपि रूपकस्य नाम्नि मृदस्ति तथापि अत्र सुवर्णचेतसाम् अमूल्यं वर्णनमेव भोभवीति ।

7. निष्कर्षः

एवम् उपर्युक्तकाव्यानां संक्षेपसमालोचनेन एतत् स्पष्टं भवति यत् संस्कृतवाङ्मये रसोल्लासानां तथा धार्मिकमूल्यानां च समन्वयः सर्वत्र विलसत्येव । अतः शृङ्गाररसप्रधानानि अपि काव्यानि पुरुषार्थबोधने समर्थान्येवेत्यस्माकं निर्णयः ।

8. ग्रन्थसूची

1. भामहः। (2002)। काव्यालङ्कारः (पी. वी. काणे, सम्पा.)। मोतीलाल् बनारसीदास्।
2. आनन्दवर्धनः। (1982)। ध्वन्यालोकः (के. कृष्णमूर्ति, सम्पा.)। मोतीलाल् बनारसीदास्।
3. मम्मटः। (2002)। काव्यप्रकाशः (वि. राघवन, सम्पा.)। अड्यार् लाइब्रेरी।
4. कुण्टकः। (1961)। वक्रोक्तिजीवितम् (एस्. के. डे, सम्पा.)। फर्मा के. एल्. एम्।
5. राजशेखरः। (1995)। काव्यमीमांसा (सी. डी. दलाल्, सम्पा.)। मोतीलाल् बनारसीदास्।
6. कालिदासः। (2001)। अभिज्ञानशाकुन्तलम् (एम्. आर्. काले, सम्पा.)। मोतीलाल् बनारसीदास्।
7. कालिदासः। (2002)। कुमारसम्भवम् (एम्. आर्. काले, सम्पा.)। मोतीलाल् बनारसीदास्।
8. भासः। (2000)। स्वप्नवासवदत्तम् (एम्. आर्. काले, सम्पा.)। मोतीलाल् बनारसीदास्।
9. भवभूतिः। (2005)। उत्तररामचरितम् (एम्. आर्. काले, सम्पा.)। मोतीलाल् बनारसीदास्।